मृगतृट्, [ष्] स्त्री, (मृगाणां तृट् पिपासा यत्र जलभासकत्वात् ।) मृगतृष्णा । इति शब्दरत्नावली ॥

मृगतृषा, स्त्री, (मृगाणां तृषा अस्त्यस्यामिति । अर्श आदित्वात् अच् । टाप् ।) मृगतृष्णा । इति शब्दरत्नावली ॥ (यथा, कामन्दकिनीतिसारे । ३ । ९३ ।
"जगन्मृगतृषातुल्यं वीक्ष्येदं क्षणभङ्गुरम् ।
सज्जनैः सङ्गतः कुर्य्यात् धर्म्माय च सुखाय च ॥")

मृगतृष्णा, स्त्री, जलाभासत्वात् मृगाणां तृष्णा विद्यतेऽस्याम् । ग्रीष्मे मरुदेशे सिकतासु अर्ककराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति सैवाचिका । इति टीकाकारः ॥ उत्कटरविरश्मिजन्यक्षितिवाष्पजालं मरीचिका । दूरशून्ये यन्मयूखैर्जलमिव दृश्यते इत्यपरे । इति भरतः ॥ तत्पर्य्यायः । मरीचिका २ । इत्यमरः । १ । ४ । ३५ ॥ मृगतृष्णिका ३ । इति भरतः ॥ मृगतृट् ४ मृगतृषा ५ । इति शब्दरत्नावली ॥

मृगतृष्णिका, स्त्री, (मृगतृष्णा + स्वार्थे कन् + स्त्रियां टाप् अत इत्वञ्च ।) मृगतृष्णा । इत्यमरटीकायां भरतः ॥ (यथा, अभिज्ञानशाकुन्तले । ६ ।
"स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे ! प्रणयवान् मृगतृष्णिकायाम् ॥")

मृगदंशकः, पुं, (मृगान् पशून् दशति । दन्श् + ण्वुल् ।) कुक्कुरः । इत्यमरः ॥

मृगधूर्त्तः, पुं, (मृगेषु पशुषु धूर्त्तः । वञ्चकत्वात् ।) शृगालः । इति संक्षिप्तसारे समासपादः ॥

मृगधूर्त्तकः, पुं, (मृगधूर्त्त + स्वार्थे कन् ।) शृगालः । इत्यमरः । २ । १० । २९ ॥

मृगनाभिः, पुं, (मृगस्य नाभिः । तदभ्यन्तरे जातत्वात् तथात्वम् ।) कस्तूरी । तत्पर्य्यायः ।
"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् ।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ॥"
सा त्रिविधा यथा,—
'कामरूपोद्भवा कृष्णा नेपाली नीलवर्णयुक् ।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता ॥
कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत् ।
काश्मीरदेशसंभूता कस्तूरी ह्यधमा स्मृता ॥'
अस्या गुणाः ।
'कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः ।
कफवातविषच्छर्द्दिशीतदौर्गन्ध्यदोषहृत् ॥'
इति भावप्रकाशः ॥
अन्यत् कस्तूरीशब्दे द्रष्टव्यम् ॥ (तथास्य पर्य्यायान्तरम् ।
'मृगनाभिर्मृगमदो मदः कस्तूरिकाण्डजः ।'
इति वैद्यकरत्नमालायाम् ॥)

मृगनाभिजा, (स्त्री, मृगनाभेर्जायते । जन् + डः । स्त्रियां ङीष् ।) कस्तूरी । यथा,—
"वनधारः सिताभश्च चन्द्रोऽथ मृगनाभिजा ।
मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि ॥"
इति हेमचन्द्रः । ३ । ३०७-८ ॥

मृगनेत्रा, स्त्री, (मृगनेत्र + "नेत्रमस्य च उपसंख्यानम् ।" ५।४।११६। इत्यत्र काशिकोक्तेः अप् ।) मृगो मृगशिरा नेता प्रापयिता यस्या रात्रेः सा रात्रिः । इति मुग्धबोधटीकायां दुर्गादासः ॥ सा अग्रहायणस्य विंशतिदण्डाधिकत्रयोविंशदिनावधिसंक्रान्तिपर्य्यन्तं प्रायः सम्भवति । तत्र नवान्नश्राद्धनिषेधो यथा । ब्रह्मपुराणे ।
"वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव कृतं भवेत् ॥
धनुषि यत् कृतं श्राद्धं मृगनेत्रासु रात्रिषु ।
पितरस्तन्न गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥"
अपरे कृष्णपक्षे । मृगो नेता प्रापयिता यासां रात्रीणामितिव्युत्पत्त्या नक्षत्रान्नेतुरित्यनेनाट्-विधानात्तत्पदं सिद्धम् । ततश्च मृगशिरःपूर्व्वार्द्धेन वृश्चिकशेषभागे रात्र्यारम्भाच्चत्वारिंशद्दण्डाधिकषड्रात्रयो मृगनेत्राः । इति मलमासतत्त्वम् ॥ (मृगस्य नेत्रे इव नेत्रे यस्य । मृगतुल्यनेत्रे, त्रि ॥)

मृगपतिः, पुं, (मृगाणां पशूनां पतिः ।) सिंहः । इति हेमचन्द्रः ॥ (यथा, भागवते ।५।२५।१०।
"यल्लीला मृगपतिराददेऽनवद्या-
मादातुं स्वजनमनांस्युदारवीर्य्यः ।"
'मृगपतिः सिंहः ।' इति तट्टीकायां श्रीधरस्वामी ॥ कामप्रदश्रेष्ठः । यथा तत्रैव टीकायाम् ।
"मृग्यन्त इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः ॥")

मृगपिप्लुः, पुं, (अपिप्लवते भासते इति । अपि + प्लु + बाहुलकात् संज्ञायां डुः । अपेरल्लोपश्च । मृगः हरिणः पिप्लुरस्य ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

मृगप्रियं, क्ली, (मृगाणां प्रियम् ।) पर्व्वततृणम् । इति राजनिर्घण्टः ॥

मृगवधाजीवः, पुं, (मृगवधेन आजीवतीति । आ + जीव् + अच् ।) व्याधः । इत्यमरः ।२।१०।२१॥

मृगबन्धनी, स्त्री, (मृगः बध्यते अनयेति । बन्ध + ल्युट् + स्त्रियां ङीप् ।) मृगबन्धनार्थजालम् । तत्पर्य्यायः । वागुरा २ । इत्यमरः ।२।१०।२६॥

मृगभक्षा, स्त्री, (मृगैर्भक्ष्यतेऽसौ । भक्ष + कर्म्मणि अप् टाप् ।) जटामांसी । इति राजनिर्घण्टः ॥

मृगमदः, पुं, (मृगाः माद्यन्ति अनेनेति । मद् + अप् ।) कस्तूरी । इत्यमरः । २ । ६ । १२८ । (यथा, छन्दोमञ्जर्य्याम् । २ । १५ । ४ ।
"मृगमदकृतचर्च्चापीतकौषेयवासा
रुचिरशिखिशिखण्डा बद्धधम्मिल्लपाशा ।"

मृगमदवासा, स्त्री, (मृगमदस्येव वासः सौरभोऽस्याः ।) कस्तूरीमल्लिका । इति राजनिर्घण्टः ॥

मृगया, स्त्री, (मृग्यन्ते पशवोऽस्यां इति । मृग + णिच् । "इच्छा ।" ३।३।१०१। इत्यत्र परिचर्य्यापरिसर्य्यामृगयाटाट्यानामुपसंख्यानम् । इति वार्त्तिकोक्त्या से यकि णिलोपः । इति सिद्धान्तकौमुदी ॥) राज्ञां वनेषु मृगहननक्रिया । मृग्यन्ते अन्विष्यन्तेऽस्याम् । शिकार इति भाषा । तत्पर्य्यायः । आच्छोदनम् २ मृगव्यम् ३ आखेटः ४ । इत्यमरः ॥ तन्नियमविधिर्यथा,—
"चचार मृगयां तत्र दृप्त आत्तेषुकार्म्मुकः ।
विहाय जायामतदर्हां मृगव्यसनलालसः ॥५॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ।
अहनत् निशितैर्व्वाणैर्वनेषु वनगोचरान् ॥६॥
तीर्थेषु श्रुतिदृष्टेषु राजा मेध्यान् पशून् वने ।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥"७॥
इति श्रीभागवते ४ स्कन्धे २६ अध्यायः ॥
आत्ता गृहीता इषवो रागद्वेषादिरूपाः कार्म्मुकञ्च भोगाद्यभिनिवेशरूपं येन । जायां विवेकवतीं बुद्धिं विहाय । अतदर्हां त्यागानर्हाम् । त्यागे हेतुः मृग्यन्ते इति मृगाः विषयाः तेषु व्यसनं भोगासक्तिस्तेन लालसा अतिस्पृहा यस्य ॥५॥ वाणै रागादिभिः । वनेषु भजनीयदेशेषु । वनगोचरान् भजनीयविषयान् । अहनत् भजनीयदेशादाक्षयात् हतवान् । कथापक्षे तु स्पष्टमेव ॥ ६ ॥ नन्वासुरीं वृत्तिमाश्रित्य इति किमिति मृगया निन्द्यते । कथापक्षे तावद्राज्ञो विहितैव सा । अध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एव इत्याशङ्क्याह तीर्थेष्विति त्रिभिः । अयं भावः । न हि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते । नियममेव षड्विधं दर्शयति । यदि अलमत्यर्थं लुब्धो रागी सन् हन्यात् तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि श्रुतिदृष्टेषु प्रख्यातेष्वेव न नित्यश्राद्धादिषु । तत्रापि राजैव । मेध्यानेव । वन एव । यावदुपयोगमेव इति । एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एव इत्यर्थः ॥ ७ ॥ इति तट्टीकायां श्रीधरस्वामी ॥ सा राज्ञां पापाय न स्यात् । यथा,—
"अवलस्वकुलाशिनो झषा-
न्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्द्दिनो मृगान्
मृगयाघाय न भूभृतां घ्नताम् ॥"
इति नैषधे २ सर्गे १० श्लोकः ॥
सा च कामजव्यसनविशेषः । यथा,—
"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥"
इति मलमासतत्त्वम् ॥

मृगयुः,पुं,(मृगं यातीति । मृग + "मृगय्वादयश्च ।" उणा० १।३८। इति कुः । निपात्यते च ।) ब्रह्मा । शृगालः । व्याधः । इति मेदिनी । ये, १०९ ॥ (यथा, भट्टिकाव्ये । ४ । ४४ ।
"मृगयुमिव मृगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन् ।")

मृगरसा, स्त्री, (मृगस्य मृगमांसस्येव रसोऽस्याः । सहदेवी । इति राजनिर्घण्टः ॥